Postal Regd.No. GAMC- 1553/2022-2024

**ISSN 2454-6313**

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८९
फेब्रुआरी - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### बुद्धिमन्तः भवन्तु भवन्तः

तैलिकस्य तैलयन्त्रे युक्तस्य कस्यचित् वृषभस्य कथा प्रसिद्धा । तस्यां कथायां वृषभः एकस्मिन्नैव चक्रे नित्यं भ्रमन् श्रान्तः भवति । दिवसे तस्य विरामः दुर्लभः एव । कस्मिंश्चित् दिवसे प्रभाते तैलिकस्य पत्नी दिवङ्गता । वृषभस्य अपि आश्चर्यम् अभवत् । यतो हि तैलिकस्य कुटुम्बे कोऽपि कदापि रुग्णः न अभवत् । तत्र मृत्योः कल्पना कुतः ? मोदमानः वृषभः तैलिकस्य समीपं शनैः गत्वा सविनयं निवेदयति – 'अहम् एतस्मिन् चक्रे सततं भ्रमन् ग्लानिम् अनुभवामि । अतः ग्रामान्ते विद्यमानेषु क्षेत्रेषु किञ्चित् विहर्तुम् इच्छामि । गृहे अहम् आकाशदर्शनम् अपि कर्तुं न शक्नोमि । तत्र गत्वा विशालं गगनं पश्यन् आत्मानं रञ्जयिष्यामि । कृपया मम प्रार्थनां भवान् स्वीकरोतु इति ।'

दयार्द्रहृदयः स्वामी (तैलिकः) अपि सम्मतिं दर्शितवान् । अथ सत्वरं क्षेत्रं प्रविष्टः वृषभः सस्यशालिनीं पृथ्वीं, निर्मलम् आकाशं च अवलोकयन् आनन्दोन्मत्तः अभवत् । सायङ्काले परिश्रान्तः सः गृहं प्रतिनिवृत्तः ।

वृषभः अपरस्मिन् दिवसे प्रभाते मौनेन चक्रस्य समीपं गत्वा, धुरं स्कन्धे संस्थाप्य स्वयमेव तत्र युक्तः अभवत् । तस्य तां क्रियां विज्ञाय स्वामी परं विस्मयं गतः । वृषभं च पृष्टवान् – 'कथम् अभवत् तव विहारः ? क्षेत्रेषु मनः मुदितं वा ?' तत् श्रुत्वा वृषभः सविषादम् उक्तवान् – 'आनन्दः जातः, परन्तु मनसि खेदः अपि जातः ।' स्वामी पुनः पृष्टवान् – 'उभयं कथं भवितुम् अर्हति ? स्पष्टं वद ।' वृषभः स्पष्टतां कृतवान् – 'तत्र सर्वेषां क्षेत्राणाम् आकारः समानतया चतुष्कोणः आसीत् । एकमपि क्षेत्रं वर्तुलं न दृश्यते स्म ।'

एषा कथा अस्माकं सर्वेषां वर्तते । नित्यम् एकस्मिन् चक्रे एव भ्रमन्तः वयं प्रभुकृपया लभ्यमानम् आनन्दं सोढुं न शक्नुमः । यन्त्रयुगे जातः यन्त्रभूतः मानवः मृत्युम् अपि यन्त्रवत् प्राप्नोति । अत्र केचन मनुष्याः एतस्मात् चक्रात् क्षणं बहिः निर्गत्य, विविधानि क्षेत्राणि प्रविश्य जीवने धन्यताम् अनुभवन्ति । 'बुद्धिमान्' लोकः तान् उन्मत्तान् वदति । अस्मिन् संसारे सदा चक्रे भ्रमणं कुर्वन् मनुष्यः एव बुद्धिमान् उच्यते । शिक्षिकाः अपि छात्रान् एवमेव उपदिशन्ति – 'बुद्धिमन्तः भवन्तु भवन्तः !! '

## सफला यात्रा

**जातककथा**

ब्रह्मदत्तः यदा काशीं परिपालयन् आसीत् तदा बोधिसत्त्वः कस्मिंश्चित् वणिक्परिवारे जन्म प्राप्तवान्। सः बाल्ये एव वाणिज्यतन्त्राणि कौशलं च ज्येष्ठेभ्यः अधीतवान्। सः एकैकम् अपि विषयं समग्रतया परिशील्य सम्यक् विचिन्त्य निर्णयं करोति स्म। एवं कुर्वन् सः स्वस्य ज्ञानं विवेकं च वर्धितवान्।

यदा सः ज्येष्ठः जातः तदा आपूर्वात् आपश्चिमं वाणिज्यार्थं प्रयाणम् आरब्धवान्। पञ्चशताधिकेषु वृषभशकटेषु वस्तूनि आरोप्य नयति स्म सः। वाणिज्येन प्रभूतं धनम् अपि सम्पादयति स्म सः।

काशीनगरे एव मन्दमतिः नाम अपरः अपि वणिक् वाणिज्यं करोति स्म। सः अन्वर्थनामकः, उपायहीनः च। कदाचित् बोधिसत्त्वः यदा वाणिज्यार्थं प्रयाणम् आरब्धवान् तदा मन्दमतिः तम् अवदत् यत् अहम् अपि वाणिज्यार्थं भवता सह आगमिष्यामि इति।

तदा बोधिसत्त्वः अवदत् – ''यदि आवयोः उभयोः अपि शकटाः युगपत् प्रयाणं कुर्युः तर्हि मार्गे महान् सम्मर्दः भवेत्, प्रयाणं च दुष्करं स्यात्। अतः आवयोः अन्यतरस्य अग्रे गमनम्, अपरस्य अनुसरणं च वरम्। भवान् अग्रगामी भवितुम् इच्छति उत अनुगामी भवितुम्? निर्णयः भवदधीनः'' इति।

मन्दमतिः अचिन्तयत् – 'यदि अहम् अग्रगामी स्यां तर्हि एव अधिकाः लाभाः। मार्गः सुगमः भवति। पानाय स्वच्छं जलं पर्याप्ततया प्राप्यते। स्वादूनि फलानि अपि प्राप्यन्ते। वृषभादीनां चरणाय हरितानि तृणानि अपि लभ्यन्ते। यत्र गच्छामि तत्र अहम् एव मूल्यनिर्णयं कृत्वा विक्रेतुं शक्नोमि। तदा एव अधिकः लाभः स्यात्' इति।

बोधिसत्त्वः अपि एतद्विषये चिन्तितवान् आसीत् – 'अग्रगामितः अपि अनुगामिता एव श्रेयसे। यः अग्रगामी भवति तेन जलम् अन्वेष्टव्यम्। जलं न प्राप्तं चेत् कूपाः निर्मातव्याः अपि। तैः सम्पादिताः कूपाः एव अनुगामिना उपयोक्तुं शक्याः। नूतने स्थले मूल्यनिश्चयः अपि क्लेशाय। यत्र मूल्यं निर्णीतं भवति तत्र विक्रयणम् एव सुकरम्। विक्रयणे समस्याः अग्रगामिना सम्मुखीक्रियन्ते, परिहारोपायाः चिन्त्यन्ते च। अनुगामिना ताः समस्याः पुनः सम्मुखीकरणीयाः न भवन्ति। अग्रगामिनः वृषभादयः यत्र तृणानि चरन्ति तत्र हरितानि तृणानि सद्यः उत्पद्यन्ते। तानि अनुगामिनः उपयोगाय भवन्ति। एवम् अनुगामिता एव श्रेयसे' इति।

अतः 'अहम् एव अग्रे गमिष्यामि' इति मन्दमतिः यदा अवदत् तदा तत् ससन्तोषम् अङ्गीकृतवान् बोधिसत्त्वः।

आत्मना उक्तः प्रस्तावः बोधिसत्त्वेन अङ्गीकृतः इत्यतः मन्दमतिः अपि सन्तुष्टः। सर्वाणि आनुकूल्यानि ममैव भवन्ति इति चिन्तयन् स्वस्य चातुर्यं स्वयम् एव प्रशंसन् यात्रायै उद्युक्तः जातः सः।

मन्दमतेः गम्यं स्थलं षष्टिक्रोशदूरे आसीत्। मध्येमार्गं मरुभूमिः अपि अतिक्रमणीया आसीत् तेन। अतः सः प्रस्थानावसरे एव आहारव्यवस्थां पानजलव्यवस्थां च यथायोग्यं कृत्वा एव स्वनगरात् प्रस्थितवान्। 'बोधिसत्त्वः मूर्खताम् आचरितवान्' इति चिन्तयति स्म सः।

मन्दमतेः अनुयायिसमूहः वस्तूनि वहन् मरुभूमिं प्राप्नोत् केषाञ्चित् दिनानां प्रयाणस्य अनन्तरम्। ततः अल्पे एव दूरे तैः एकः अपूर्वः शकटः दृष्टः। शकटे उत्तमजातीयाः दृढकायाः वृषभाः योजिताः आसन्। शकटस्य पुरतः खड्गधारिणः धनुर्धारिणः गदाधारिणः च सैनिकाः स्थिताः आसन्। शकटे कश्चन राजपुरुषः गाम्भीर्येण उपविष्टः आसीत्। शकटस्य चक्रेषु पङ्कः लग्नः दृश्यते स्म। सर्वेषां हस्ते कमलपुष्पाणि आसन्।

सः शकटस्थः राजपुरुषः मन्दमतिम् अवदत् – ''अहो, तत्र महती वृष्टिः जाता ! सर्वत्र जलप्रवाहः एव दृश्यते। अरण्यं समग्रं जलमयं जातम् अस्ति। भवन्तः अपि तस्यां दिशि एव गच्छन्ति इति मन्ये। एतेषु पात्रेषु जलं किमर्थं नीयते तत्र ? व्यर्थः भारः किमर्थम् उह्यते ? एतत् जलं क्षिपन्तु। सुखेन प्रयाणं कुर्वन्तु च'' इति।

सः राजपुरुषः तेन सह स्थिताः च नरभक्षकाः यक्षाः। ते मरुभूमौ प्रयाणं कुर्वतः जनान् एवम् एव उपदिशन्तः मधुरैः वचनैः वञ्चयन्ति स्म। यदा यात्रिकाः जलाभावकारणतः मरणं प्राप्नुवन्ति तदा तान् खादन्ति स्म ते।

मन्दमतिः तेषाम् एतत् कुतन्त्रं न जानाति स्म। तेषां वचनेषु विश्वसन् सः जलपात्राणि रिक्तीकारितवान्। प्रयाणम् अनुवर्तितवान् च। सुदूरं प्रयाणं कृतं चेदपि तैः वृष्टिलक्षणं न दृष्टम्। क्षणे क्षणे जलाभावसमस्या वर्धते स्म।

वणिग्जनाः पिपासया पीड्यमानाः आसन्। पानार्थं जलस्य बिन्दुः अपि न दृश्यते स्म। सर्वेषां कण्ठाः शुष्काः जाताः आसन्। तस्मात् एकैकशः मरणं प्राप्तवन्तः ते। ये जनाः पशवः च मृताः तान् यक्षाः खादितवन्तः। तेषाम् अस्थिपञ्जराणि मरुभूमौ ते क्षिप्तवन्तः।

ततः चत्वारिंशतः दिनानाम् अनन्तरं बोधिसत्त्वः अपि अनुचरैः सह प्रयाणम् आरब्धवान्। सः अपि मरुभूमियात्रानिमित्तम् आहारपदार्थान् जलं च स्वीकृत्य प्रस्थितवान् आसीत्।

मरुभूमिः यदा प्राप्ता तदा सः अनुचरान् उक्तवान् – ''मम अनुज्ञां विना जलस्य एकः बिन्दुः अपि न उपयोक्तव्यः, व्यर्थीकरणीयः वा। एतस्यां मरुभूमौ विविधाः विषवृक्षाः भवन्ति। अतः मम अनुज्ञां विना कोऽपि किमपि फलं पर्णं वा न खादेत्'' इति। मरुभूमौ यदा किञ्चिद्दूरं गतं तदा शकटे उपविष्टः राजपुरुषः तेषां पुरतः प्रत्यक्षः जातः। मन्दमतिः यथा उक्तः तथैव बोधिसत्त्वः अपि उक्तः तेन। तदा बोधिसत्त्वः तान् अवदत् ''एतत् भवद्भिः वक्तव्यं नास्ति। वयं वणिजः स्मः। यावत् अन्यत्र जलं न प्राप्यते तावत् विद्यमानं जलं न क्षिपामः वयम्। अतः अन्यत्र यदा जलं प्राप्स्यते तदा एतस्य क्षेपणविचारं करिष्यामः'' इति। एतत् उत्तरं श्रुत्वा यक्षाः विना प्रतिवचनं पलायितवन्तः।

बोधिसत्त्वस्य अनुचरेषु केचन यक्षाणां वचने विश्वासं कृतवन्तः आसन्। ते जलक्षेपणं समर्थितवन्तः।

तदा बोधिसत्त्वः तान् अबोधयत् – ''एतस्मिन् प्रदेशे जलाशयः अस्ति इति किं भवद्भिः कदापि श्रुतम् ? ते वदन्तः आसन् यत् मुसलधारावृष्टिः जाता अस्ति इति। किं भवद्भिः शीतलवायोः अनुभवः प्राप्तः ? आकाशे किं मेघाः दृष्टाः ? मेघगर्जनं किं श्रुतम् ? तडितः किं लक्षिताः ? अस्माभिः ये दृष्टाः ते कपटिनः यक्षाः। पिपासया अस्मान् मारयित्वा खादितुम् इच्छन्ति ते। इतः पूर्वं ये गताः तान् एतावता खादितवन्तः स्युः एते। मध्येमार्गं तेषाम् अस्थिपञ्जराणि अस्माभिः प्राप्येरन्'' इति। तैः किञ्चिदग्रे यदा गतं तदा वृषभशकटाः, वस्तूनि च दृष्टानि। इतस्ततः पतितानि मनुष्याणां पशूनां च अस्थिपञ्जराणि अपि तैः दृष्टानि। तत्रत्यं दृश्यं घोरं भयानकं च आसीत्।

''दृष्टं खलु भवद्भिः – मन्दमतिः कीदृशीं मूर्खताम् आचरितवान् इति ? परकीयानां वचनेषु विश्वस्य तेन जलं क्षिप्तम्। तस्य परिणामतः एतादृशं घोरं मरणं प्राप्तम्'' इति अवदत् बोधिसत्त्वः।

बोधिसत्त्वस्य जनाः तस्यां रात्रौ तत्रैव वासं कृतवन्तः। पूर्वम् आगतैः आनीतेषु वस्तुषु यानि नष्टानि न आसन् तानि सङ्गृह्य ते नीतवन्तः। ततः ते गम्यस्थानं प्राप्तवन्तः। सम्यक् वाणिज्यं च कृतवन्तः। तस्मात् प्रभूतं लाभं सम्पाद्य स्वदेशं प्रत्यागतवन्तः। एतस्यां यात्रायां तेषु एकस्यापि मानवस्य पशोः वा हानिः न जाता।

# भासो हासः कविकुल-गुरुः कालिदासो विलासः

डॉ. सुखेश्वरः झा

संस्कृत-सरस्वती सहृदयैर्मनोहारिणी कामिनीव निरूप्यते। तस्याश्च कामिन्याः मनोमोहकं रूपम् आलोचकचयैः निर्धार्यते। प्रमदायाः केशपाशः, अङ्गच्छविम् अभिवर्द्धयन्ती अलङ्कृतिः, हास-विलासौ, मदनाविष्टं हृष्टं रूपम्-इत्यादीनि तत्त्वानि सहृदय-हृदयेषु कुतूहलम् आवेशयन्ति। कविताङ्गना किल भाषामयी प्रसिद्धा। ताश्च भाषाः कालिदासादीनां वर्तन्ते याभिः संस्कृत-कविता-रमणी सुघटिता स-प्राणा च बोभवीति। ततश्च भाषा-भाषावतोः अभेद-विवक्षया ते ते कवय एव स्वस्व-भाषारूपतां दधानाः संस्कृत-काव्याङ्गनायाः तत्तदङ्गानि, आभरणानि, शृङ्गारविचेष्टितानि च आलोचकैरमानिषत।

तत्र भासः तस्याः कामिन्याः विद्वत्तरुणचेतोहरो हासः इति आलोचकाः निश्चिन्वन्ति। कवि-गुरुः कालिदासः तस्याः कामिन्याः विलासः अभिधीयते तैः। न कापि रमणी हास-विहरिता मनोमोदकारिणी कथ्येत, न च वा विलास-विहीनाङ्गना मानसोल्लासिनी स्यात्। अतः हास-विलासौ सुन्दर्याः अनिवार्य-तत्त्वभूतौ। ते च इमे तत्त्वे संस्कृत-कविता-रमण्याः भास-कालिदास-भाषेऽवगन्तव्ये।

'हस्' धातोः घञ्-प्रत्यये कृते 'हास' -शब्दः निष्पद्यते। 'हसितम्' इति तस्यार्थः। स च हृदय-प्रसादमूलकः आस्य-पद्मविकसनरूपः भवति। संस्कृतकामिन्याः स तादृशः हासः भास-वचोमूलकः इति आलोचकस्य उद्भावना वर्तते। कालिदासादपि प्राक्तनः महाकविर्भासः त्रयोदश-नाटक-चक्र-प्रणेता सुविख्यातः। तस्य नाटकचक्रे 'स्वप्नवासवदत्तं' नाम नाटकम् अतिलोकप्रियम्। तस्य इदं मङ्गलपद्यम्।

**उदयनवेन्दुसवर्णा वासवदत्तावलौ बलस्य त्वाम्।**
**पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्॥ इति।**

सेयं भाषा हसन्ती भासस्य वस्तुतः सहृदयानां चित्तप्रसादं जनयति।

वागादिवैकृतैः यः चेतोविकासः स हासः (सा. द. ३/१७६) इत्यर्थे कृते सति तु विदूषकादेर्भाषा (स्वप्न०, अङ्क ४ इत्यस्य आरम्भादौ) हासजनिकेति सैव हास-प्रतीकभूता मन्येत इति व्यापकत्वं न स्यात्। वस्तुतः प्रसादमूलको हासः भूयस्त्वेन भास-कृतीः व्याप्नोति। कालिदासस्तु कविकुल-गुरुरेव। चलनं, स्थानम्, अवलोकनं स्मितपूर्वाभिभाषणम्, हस्तपादादि सञ्चालनम् कामिन्याः वैचित्र्य-विभूषितं विलसितं मन्यते। "यान-स्थानासनादीनां मुखनेत्रादिकर्मणाम्। विशेषस्तु विलासः स्याद् इष्ट-सन्दर्शनादिना" (सा.द. ३/९९) इति।

संस्कृत-कामिन्याः यो विलासः सः कालिदासवचसि आलोचकैः अनुभूयते। 'सरसिजमनुविद्धं'.. (शा. १/१८), 'तन्वी श्यामा शिखरिदशना' ... (उ.मे. -१९) इत्याद्युक्तिषु, समग्र एव वा कालिदासवचसि वस्तुतः संस्कृतकामिन्याः विलासः आलोचकैः सम्यङ् निर्धारितः। तस्मात् कविता-कामिन्याः हास-विलासयोः सम्बन्धे कृता अभिव्यक्तिः विवादरहिता प्रतिभाति। संस्कृत-कविताङ्गनायाः मनोहारितायाः प्रमापकानां केशालङ्कारादीनां चेष्टानाञ्च निर्धारकः अधोलिखितः श्लोकः 'प्रसन्नराघव' प्रस्तावनायां वर्तते -

**यस्याश्चोरश्चिकुरनिकुरः कर्णपूरो मयूरोभासो हासः कविकुलगुरुः कालिदासो विलासः।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः केषां नैषा कथय कविताकामिनी कौतुकाय ?॥**

अस्मिन् श्लोके एकचरणतया निर्दिष्टा पंक्तिरेव 'भासोहासः' इत्यस्य मूलम्।

वस्तुतः भासकालिदासादयः महान्तः कवयः संस्कृत-काव्य-प्रणेतारः स्व-स्व-रसवत्या सरस्वत्या संस्कृत-कविता-कामिनीं विश्वविश्रुत-रूपां कुर्वत इति सत्यम्। परन्तु अस्य लेखस्य यत् शीर्षकं तस्य मूलभूतो यः प्रसन्नराघव-प्रणेतुर्जयदेवस्य श्लोकः सहृदयस्य भावुकस्य शब्दालङ्कारप्रियता एव तस्य मुख्यो हेतुः। चोरः चिकुरनिकुरः, मयूरः कर्णपूरः, भासः हासः, कालिदासः विलासः, हर्षः हर्षः, बाणः पञ्चबाणः, - इति सर्वत्रैव ध्वनिसाम्यं सञ्चिन्वन् एव प्रवर्तमानः प्रणेताऽस्य पद्यस्य स्फुटं प्रतीयते। अत्र पद्ये निर्दिष्टेष्वेषु काव्य-प्रणेतृषु एकैकः कविः सर्वावयवसुन्दरीम् अनवद्य-गद्य-पद्यमयीं मनोहारिणीं कविता-तरुणीम् उद्भावयितुमीशश्चेत् कविताङ्गनायाः एकैकतत्त्व-प्रणेतृतया तेषाम् अभिधानं स्वल्पमेवेत्येव मन्तव्यमिति।

## मासवार्ता

### सम्पन्नः पुस्तकलोकार्पणकार्यक्रमः



'काव्येषु नाटकं रम्यम्...' इति उक्तिः नाटकस्य बहुश्रुतिं नितरां पिशुनयति। न केवलं प्राचीनानि, अपि तु आधुनिकानि नाटकानि अपि रसिकजनानां हृदयानि भृशं रञ्जयन्ति। अथ सद्यः प्रकाशितं नाटकं नाम 'प्रतिबिम्बम्'। सतीशगज्जर्प्रणीतस्य अस्य नाटकस्य लोकार्पणकार्यक्रमः रसास्वादनकार्यक्रमः च २९ जान्युआरी, २०२२ तमे दिनाङ्के अमदावादनगरे (एच.टी. पारेख हॉल, अटीरा) आयोजितः। संस्कृतविद्याप्रतिष्ठानम्, अमदावाद-संस्कृत-एकेडमी च इत्यनयोः संयुक्तेन उपक्रमेण सम्पन्ने अस्मिन् "काव्येषु नाटकं रम्यम्..." कार्यक्रमे नाटकस्य आस्वादनं विद्वद्वर्यः डॉ. अमृतलालः भोगायता कारितवान्। कार्यक्रमस्य अध्यक्षः स्वामी श्रीपरमात्मानन्दः, अतिथिविशेषः श्री गोपालः सुतरिया, अतिथिः डॉ.ललितः पटेल च वचःकुसुमैः कार्यक्रमम् अभिनन्दितवन्तः। नाटकस्य सम्पादकौ निमन्त्रकौ च डॉ.मिहिरः उपाध्यायः, डॉ.गोपालः उपाध्यायः च समग्रस्य कार्यक्रमस्य आयोजनं दिग्दर्शनं च कृतवन्तौ। श्रीश्यामः पटेलः कार्यक्रमस्य सुचारु सञ्चालनं कृतवान्।

### आरब्धः संस्कृतभाषाशिक्षणवर्गः

संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य अनेकान् वर्गान् नियमितम् आयोजयति। एतस्मिन् एव उपक्रमे जनवरीमासस्य तृतीयदिनाङ्के संस्कृतभाषाशिक्षणस्य प्राथमिकः वर्गः आरब्धः वर्तते। वर्गेऽस्मिन् २० छात्राः प्रवेशं स्वीकृतवन्तः। अयं वर्गः मार्चमासस्य ३० दिनाङ्कं यावत् प्रचलिष्यति।

## कृपया हसन्तु

युवती - (युवकम् उद्दिश्य) त्वं कुत्र कार्यं करोषि ?

युवकः - अहं 'टाईम्स ऑफ इन्डिया' इति वर्तमानपत्रे कार्यं करोमि स्म, किन्तु मया ह्यः एव तत् कार्यं त्यक्तम् ।

युवती - किमर्थम् ?

युवकः - एतादृशे शीतकाले प्रातः शीघ्रम् उत्थाय कः वर्तमानपत्राणि वितरितुं गच्छेत् ?

★ ★ ★ ★ ★

अधिकारी - (सेवकम् उद्दिश्य) भोः, यदा मया दूरभाषः कृतः आसीत् तदा 'भवान् पाकं पचन् अस्ति' इति भवतः पत्नी उक्तवती । किन्तु पाककार्यं समाप्य भवता दूरभाषः किमर्थं न कृतः ?

सेवकः - महोदय, मया दूरभाषः कृतः आसीत् किन्तु तदा 'भवान् पात्राणि क्षालयन् अस्ति' इति भवतः पत्नी उक्तवती अतः मया दूरभाषः स्थापितः ।

★ ★ ★ ★ ★

अद्यत्वे केचन तादृशाः जनाः सन्ति ये चालयितुं यानं याचन्ते....

तत्रापि मम नास्ति समस्या.....

याने तैलं पूरयन्ति वा न, तत्रापि नास्ति चिन्ता...

किन्तु यानप्रत्यार्पणसमये- "यानं समीकारयतु याने अधिकः व्ययः अस्ति" इति उक्त्वा यानं प्रयच्छन्ति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥**

**तात्पर्यम्** – अस्मिन् देशे (भारते) जातात् श्रेष्ठज्ञानिनः प्रपञ्चस्य सर्वे मानवाः स्वस्य निमित्तं योग्यस्य चरित्रस्य (गुणव्यवहारादीनां) शिक्षणं प्राप्नुवन्ति स्म।

**एहि ब्रूहि समाधेहि समाश्वसिहि मास्म भीः ।**
**आपन्नमिति यो ब्रूयात् तस्य लोको वशंवदः ॥**

**तात्पर्यम्** – आगच्छतु, मिलतु, धैर्येण भवतु, भीतः मास्तु, उपविशतु – इत्यादिभिः वचनैः विद्यमानान् ये समाश्वसन्ति तेषाम् इदं जगत् वशीभूतः भवति।

**काकः कृष्ण पिकः कृष्णः को भेदः पिककाकयोः ।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥**

**तात्पर्यम्** – काकः कृष्णवर्णः, पिकः अपि कृष्णवर्णः किन्तु एतयोर्मध्ये स्वरूपभेदः नास्ति । यदि वसन्तकालः आगच्छति तदा भेदः ज्ञायते। काकः केवलं काकायते, पिकः तु मधुरं गायति।

## ज्ञानसरिता

**खर्ज्जूरफलम्** – उत्तरायणपर्वणि होलिकादहनोत्सवे च खर्ज्जूरस्य उपयोगः विशेषतया भवति। तस्य मुख्यकारणम् अस्ति यत् खर्ज्जूरफलं शक्तिदायी फलम् अस्ति। आगच्छन्तु! खर्ज्जूरस्य विषये ज्ञातुं यतामहे। खर्ज्जूरं बीजयुक्तं फलम्। तत् नारिकेलस्य वृक्षेण सदृशस्य खर्ज्जूरीवृक्षस्य उपरि फलति। वृक्षस्योपरि खर्ज्जूरस्य गुच्छरूपेण विकासः भवति। एकस्मिन् गुच्छे ४०० तः २००० पर्यन्तं खर्ज्जूरफलानि भवन्ति। प्रारम्भे वृक्षे हरितवर्णुक्तानि खर्ज्जूराणि गुच्छरूपेण दृश्यन्ते। तेषु पक्वेषु जातेषु पीतवर्णियानि दृश्यन्ते। खर्ज्जूरफलं विपणिं प्राप्नोति तस्मात् पूर्वं रूपत्रयं धरति।

प्रथमं पीतवर्णियं खर्ज्जूरं ''खलाल'' नामधेयं भवति। द्वितीये स्तरे ''रूताब'' नामाख्यं तथा च अन्तिमे चरणे यत् मृदु खर्ज्जूरं वयं विपणितः क्रीणीमः तत्। खर्ज्जूरीवृक्षतः अवतारितानि खर्ज्जूरफलानि विपणिं प्राप्नुवन्ति तस्मिन् २०० दिनानि व्यतितानि भवन्ति। खर्ज्जूरवृक्षस्य औन्नत्यं २०तः २४ मीटरपरिमितपर्यन्तं भवति। खर्ज्जूरीवृक्षे शाखाः न भवन्ति। वृक्षस्य स्कन्धस्य उपरि दीर्घपर्णानि स्कन्धं परितः व्याप्नुवन्ति। एवं तस्य मूलेषु अपि एकं मूलमेव भूमौ गभीरं गच्छति। न सर्वाणि मूलानि। खर्ज्जूरीवृक्षस्य पर्णानां दीर्घत्वं रतः ५ मीटरपरिमितं यावत् भवति। पुंस्त्वं स्त्रीत्वं वा धृतेषु खर्ज्जूरीवृक्षेषु केवलं स्त्रीत्वधृताः वृक्षाः फलन्ति। एकस्मिन् ऋतौ एकः खर्ज्जूरीवृक्षः १०० किलोग्राम–परिमितानि खर्ज्जूरफलानि यच्छति। इरानदेशे इजिप्तदेशे साउदी–अरेबियादेशे च आहत्य आवर्षं १ कोटिटनपरिमितानि खर्ज्जूराणि सम्भवन्ति। खर्ज्जूरं सूर्यातपे शुष्कीकृत्य 'खारेक' संज्ञं भवति। भारतम् अपि खर्ज्जूरस्य अत्युत्पादनं कृत्वा विदेशेषु विक्रीणीते।

खर्ज्जूरम् – date, गुच्छः – bunch, स्कन्धः – truck of tree, गभीरम् – deep

## शब्दमञ्जूषा

| | |
|---|---|
| **जाड्यम्** | sluggishness |
| **पाशः** | snare |
| **सामाजिकः** | social |
| **समाजवादः** | socialism |
| **समाजवादी** | socialist |
| **जामाता** | son-in-law |
| **आत्मा** | soul |
| **खनित्रम्** | spade |
| **अध्यात्मिकगुरुः** | spiritual adviser |
| **क्रीडा** | sport |
| **अङ्कुरः** | sprout |
| **कलङ्कः** | stain |
| **वृन्तम्** | stalk |
| **स्थायीसमितिः** | standing committee |
| **स्थितिस्थानम्** | station |

## किं भवन्तः जानन्ति ?

**१ ) रामसेतुः कियत् दीर्घः आसीत् ?**
(क) १० योजन (ख) ५० योजन (ग) १०० योजन (घ) १५० योजन

**२ ) अश्वमेधयज्ञः कति वर्षाणि प्राचलत् ?**
(क) ५ (ख) १० (ग) १ (घ) ११

**३ ) सम्राट् अशोकः कति स्तूपान् निर्मापितवान् ?**
(क) ८०,००० (ख) ८२,००० (ग) ८४,००० (घ) ८६,०००

**४ ) हिन्दूकालगणनानुसारं सर्वाधिकलघ्वी कालगणना कास्ति ?**
(क) काष्ठा (ख) निमेष (ग) मुहूर्त (घ) अहोरात्र

**५ ) कालगणनानुसारं एकस्याम् अहोरात्र्याम् कति मुहूर्ताः भवन्ति ?**
(क) २० (ख) ३० (ग) ४० (घ) ५०

**६ ) एकस्मिन् मुहूर्ते कति कलाः भवन्ति ?**
(क) ३० (ख) ४० (ग) ५० (घ) ६०

**७ ) एकस्मिन् संवत्सरे कति अहोरात्र्यः भवन्ति ?**
(क) २२० (ख) ३६० (ग) २९० (घ) ३१०

उत्तराणि – (१) ग (२) ग (३) ग (४) ख (५) ख (६) क (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First level**

**Date :** 4/4/22 to 29/6/22
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 5000/-

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## छन्दःपरिचयः

**First level**

**Date :** 1/3/22 to 31/3/22
**Day :** Tuesday, Thursday
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 2500/-

**Admission Open 2022-23**

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**
**Online / Offline**

संस्कृत-**साम्प्रतम्**

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## स्तोत्रपाठः

## ( निश्चितस्तोत्राणि )

**Date :** 10/2/22 to 15/3/22
**Day :** Tuesday, Thursday
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 2500/-

➤ **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006